# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## परीक्षा – एप्रिल – २०१९

कक्षा: शास्त्री-२ (Sem-4) प्रश्नपत्रम् – ४ कुल गुणा: ७०

विषय:- ज्योतिषशास्त्रम् कोड नं.:- O.E.2.4.4 समय: ०३:०० त: ६:००

दिनाङ्क:- ०२-०४-२०१९ सन्दर्भग्रन्थ: - जातकालंकार:, चमत्कारचिण्तामणि:, के. जातकपद्धति

---

**प्रथमान्विति: (Unit-1)**

**प्रश्न: – १ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत।** ०८

(१) लग्नादिन्दो: शुभो वा यदि मदनपतिर्द्युनयायी विषाख्या
दोषं चैवानपत्यं तदनु च नियतं हन्ति वैधव्यदोषम्।
इत्थं ज्ञेयं ग्रहज्ञै: सुमतिभिरखिलं योगजातं ग्रहाणां
आर्यैरार्यानुमत्या मतमिह गदितं जातके जातकाणाम्॥

(२) वागीशे हीनवीर्ये व्ययतनुजगते यामिनीशे खशैले
धर्मे सर्वै: परायु: खलखगलवगै: केन्द्रयातैरशीति:।
क्रुरै: क्रुरर्क्षयातै: शुभभवनगतै: सौम्यखेटै: सवीर्ये
लग्नेशे स्यात्परायु: सुतभवनगतै: षष्टिरायुर्नराणाम्॥

(३) अंगेशे रन्ध्रयाते निधनगृहपतावंगगे द्युतबुद्धि:
शुरश्चौर्यादिसक्तो निधनपदमियाद्भूपतेर्लोकतो वा।
देहाधिशे शुभस्थे शुभभवनपतौ देहसंस्थे विदेशी
धर्मासक्तो नितान्तं सुरगुरुभजने तत्परो राजमान्य:॥

**प्रश्न: – २ अधोलिखितयो: एकस्य उपरि निबन्धं निबन्धयत।** ०८

(१) दीर्घायुयोगा: (२) ग्रन्थकारस्य वंशवर्णनं कुरुत।

**प्रश्न: – ३ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत।** ०४

(१) कुलप्रसिद्धयोग: (३) लग्नदशमयो: वैपरीत्ययोग:
(२) शतवर्षायुयोग: (४) विषाख्यभंगयोगा:

**प्रश्न: – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) विषाख्ययोगस्य किं फलम् ?
(२) वारुणर्क्ष: कस्य संज्ञा?
(३) जन्मिनां किं मूलम्?
(४) लग्नाधीशोऽतिवीर्यो यदि शुभविहगैरीक्षित: केन्द्रयातै: किं फलं स्यात्?
(५) ग्रन्थकारस्य जन्म: कुत्र अभवत्?
(६) रिष्फ: कस्य संज्ञा ?
(७) क्रुरा: के?

**द्वितीयान्विति: (Unit-2)**

**प्रश्न: – ५ अधोलिखितेषु कयोश्चिद् द्वयो: सप्रसङ्गं व्याख्यां कुरुत।।** ०८

(१) मनीषी कृतं न त्यजेद्बन्धुवर्ग: सदा पालयेत्पूजित: स्याद् गुणै: स्वै:।
सभा द्योतको यस्य चेत्त्रित्रिकोणे तम: कौतुकी देवतीर्थे दयालु:॥

(२) कुतो बाहुवीर्य कुतो बाहुलक्ष्मीस्तृतीये न चेन्मङ्गलो मानवानाम्।
सहोत्थव्यथा भण्यते केन तेषां तपश्चर्या चोपहास्य: कथं स्यात्॥

(३) कवीत्वे मतिर्दण्डनेतृत्वशक्तिर्मुखे दोषधृक् शीघ्रभोगांत एव।
कुटुंबे गुरौ कष्टतो द्रव्यलब्धि: सदा नो धनं विश्रमेद् यत्नतोऽपि॥

**प्रश्न: – ६ अधोलिखितयो: प्रश्नयो: कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) चमत्कारचिन्तामणिग्रन्थाधरेण षष्ठभावत: द्वादशभावगतसूर्यफलम् (२) ग्रन्थानुसारं शनिफलम्

**प्रश्न: – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) पञ्चमस्थकुजफलम्
(२) सप्तमस्थशनिफलम्
(३) तृतीयस्थबुधफलम्
(४) चतुर्थस्थगुरुफलम्

**प्रश्न: – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०२

(१) सूर्य: कस्य भावस्य कारक:?
(२) शुक्र: कस्याधिप:?
(३) चतुर्थे चन्द्र: किं फलं प्रयच्छति ?
(४) आर: कस्य संज्ञा?
(५) चमत्कारचिण्तामणे: कर्ता क:?
(६) निधीश: क:?
(७) जातक: चारुभाषि कदा भवेत्?

**तृतीयान्विति: (Unit-3)**

**प्रश्न: – ९ अधोलिखितयो: द्वयो: व्याख्यां कुरुत।।** ०८

(१) मन्दाल्लग्नमिनात्कुजाच्च हिबुकं शोध्यं विधोर्भार्गवात्
माध्यं ज्ञादुरुतोस्तमत्र रसभात्पुष्टं त्यजेच्चक्रत:।
दिग्वीर्यं रसत्दृत्त्वथो समयजं रूपं सदा स्याद्विद
स्त्रिंशद्वक्तनतोन्नते शशिकुजार्कीणां परेषां बलम्॥

(२) मेषादिगे सायनभागसूर्ये दिनार्द्धजाभा पलभा भवेत्सा।
त्रिष्ठा हता स्युर्दशभिर्भुजङ्गैर्दिग्भिश्चराधानि गुणोद्धृतान्त्या॥

(३) नीचोनो भगणाच्च्युत: षडधिकश्चेत्षड् हृदौच्च बलं
स्वर्क्षेऽर्धं समभेऽशष्टमस्त्रिचरणा मूलत्रिकोणे बलम्।
मित्रर्क्षेऽङ्घ्रिरधीष्टभे त्रय इभांशा वैरिभेऽष्ट्यंशको
दन्तांशोऽध्यरिभे गृहादिपवशात्खेटस्य सप्तैक्यजम्॥

**प्रश्न: – १० अधोलिखितयो: प्रश्नयो: एकस्यो साधनं विधियताम्।** ०८

(१) अहर्गणानयनम्
(२) मध्यमसूर्यसाधनम्

**प्रश्न: – ११ निम्नलिखितयो: कस्यचिदेकस्य उपरि टिप्पणीं लिखत।** ०२

(१) वारसाधनम्
(२) चरखण्डसाधनम्

**प्रश्न: – १२ अधोलिखितेषु कयोश्चिद् द्वयो: अतिलघूत्तरं लिखत।** ०२

(१) स्पष्टसूर्यस्य साधने कस्य संस्कार: न भवति?
(२) सूर्यस्य मित्राणि कानि ?
(३) केशवीयजातकपद्धते: कर्ता क:?

***